## षोडशः पाठः

# भ्रातृस्नेहः

संवेदनामयं हि मानवजीवनम्। भवत्यस्माकं सामाजिकानां जीवने नैकविधानां सामाजिकभावानां महत्त्वपूर्णं स्थानं। तेषु मातृभक्तिः, गुरुभक्तिः, भ्रातृप्रेम, राष्ट्रसेवा इत्यादयः अंशाः मानवे सच्चरित्र्यस्य द्योतकाः सन्ति, एते अंशाः संस्कृतसाहित्ये प्राचुर्येण विकीर्णास्सन्ति। संस्कृतसाहित्यस्य नाटककारेषु प्राचीनः प्रथितो महाकविः भासः। तेन विरचितेषु नाटकेषु अन्यतमं प्रतिमानाटकम्। तस्मान्नाटकादयं पाठयांशः। अस्मिन् रामभरतयोः अलौकिकं प्रेम चित्रितम्। एतादृशान्युदाहरणानि स्वजीवने अनुकरणीयाणि।

(ततः प्रविशति भरतो रथेन सुमन्त्रः सूतश्च)

**भरतः** – भोस्तात!

**सुमन्त्रः** – कुमार! अयमस्मि।

**भरतः** – क्व तत्र भवान् ममार्यो रामः? क्व सन्निदर्शनं सारवताम्? क्व तत् पात्रं यशसः? क्वासौ सत्यमनुव्रतः?

**सुमन्त्रः** – कुमार! एतस्मिन्नाश्रमपदे –

**अत्र रामश्च सीता च लक्ष्मणश्च महायशाः।**
**सत्यं शीलं च भक्तिश्च येषु विग्रहवत् स्थिताः॥**

**भरतः** – तेन हि स्थाप्यतां रथः।

**सूतः** – यदाज्ञापयत्यायुष्मान्। (तथा करोति)

**भरतः** – भोस्तात! निवेद्यताम्, निवेद्यताम्।

**सुमन्त्रः** – कुमार! किमिति निवेद्यते?

**भरतः** – राज्यलुब्धायाः कैकेय्याः पुत्रो भरतः प्राप्त इति।

**सुमन्त्रः** – कुमार! अलं गुरुजनापवादमभिधातुम्।

**भरतः** – तिष्ठतु तात! अहमेव निवेदयिष्ये पितृवचनकराय राघवाय –

**निर्घृणश्च कृतघ्नश्च प्राकृतः प्रियसाहसः।**
**भक्तिमानागतः कश्चित् कथं तिष्ठतु यात्विति॥**

(ततः प्रविशति रामः सीतालक्ष्मणाभ्याम्)

**रामः** – सर्वथा नायमबान्धवस्य स्वरसंयोगः क्लेदयतीव मे हृदयम्। वत्स! लक्ष्मण! दृश्यतां तावत्।

**लक्ष्मणः** – बाढम् (उपेत्य) आर्य!

**अयं ते दयितोभ्राता भरतो भ्रातृवत्सलः।**
**संक्रान्तं यत्र ते रूपमादर्शे इव तिष्ठति॥**

**रामः** – लक्ष्मण! किमेव! भरतः प्राप्तः?

**लक्ष्मणः** – आर्य! अथ किम्?

**रामः** – मैथिलि! भरतावलोकनार्थं विशालीक्रियतां ते चक्षुः।

**भरतः** – (राममुपागम्य) आर्य! अभिवादये, भरतोऽहमस्मि।

**रामः** - (सहर्षम्) एह्येहि इक्ष्वाकुकुमार! स्वस्ति! आयुष्मान् भव!

**वक्षः प्रसारय कपाटपुटप्रमाणमालिङ्ग मां सुविपुलेन भुजद्वयेन।**
**उन्नामयाननमिदं शरदिन्दुकल्पं प्रह्लादय व्यसनदग्धमिदं शरीरम्॥**

**भरतः** - अनुग्रहीतोऽस्मि।

**सुमन्त्रः** - (उपेत्य) जयत्वायुष्मान्।

**रामः** - हा तात!

**सुमन्त्रः** - (सशोकम्)

**नरपतिनिधनं भवत्प्रवासं भरतविषादमनाथतां कुलस्य।**
**बहुविधमनुभूय दुष्प्रसह्यं गुण इव बह्वपराद्धमायुषा मे॥**

**सीता** - रुदन्तमार्यपुत्रं पुनरपि रोदयति तातः।

**रामः** - मैथिलि! एष पर्यवस्थापयाम्यात्मानम्। वत्स! लक्ष्मण! आपस्तावत्।

**लक्ष्मणः** - यदाज्ञापयत्यार्यः

**भरतः** - आर्य! न खलु न्याय्यम्। क्रमेण शुश्रूषायिष्ये। अहमेव यास्यामि। (कलशं गृहीत्वा निष्क्रम्य पुनः प्रविश्य) इमा आपः।

**रामः** - (आचम्य) मैथिलि! विशीर्यते खलु लक्ष्मणस्य व्यापारः।

**सीता** - आर्यपुत्र! नन्वेतेनापि शुश्रूषचितव्यः।

**रामः** - सुष्ठु खल्विह लक्ष्मणः शुश्रूषयतु। तत्रस्थो मां भरतः शुश्रूषयतु।

**भरतः** - प्रसीदत्वार्य!

**इह स्थास्यामि देहेन तत्र स्थास्यामि कर्मणा।**
**नाम्नैव भवतो राज्यं कृतरक्षं भविष्यति॥**

**रामः** - वत्स! मा मैवम्।

**पितुर्नियोगादहमागतो वनं न वत्स! दर्पान्न भयान्न विभ्रमात्।**
**कुलं च नः सत्यधनं ब्रवीमि ते कथं भवान् नीचपथे प्रवर्तते॥**

**भरतः** - हन्त अनुत्तरमभिहितम्। भवतु समयस्ते राज्यं परिपालयामि।

**रामः** - वत्स! कः समयः?

**भरतः** - मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुमिच्छामि।

**रामः** - एवमस्तु।

**भरतः** - आर्य! अन्यमपि वरं हर्तुमिच्छामि।

**रामः** - वत्स! किमिच्छसि किमहं ददामि? किमहमनुष्ठास्यामि?

**भरतः** - **पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।**
**यावद्भवानेष्यति कार्यसिद्धिं तावद्भविष्याम्यनयोर्विधेयः॥**

**रामः** - तथास्तु। वत्स! गृह्यताम्।

**भरतः** - अनुग्रहीतोऽस्मि।

## अन्वयः

1. अत्र महायशाः रामः सीता लक्ष्मणश्च येषु सत्यं शीलं भक्तिश्च विग्रहवत् स्थिताः।
2. निर्घृणः कृतघ्नश्च प्राकृतः प्रियसाहसः भक्तिमान् कश्चिद् तिष्ठतु कथं यातु इति।
3. अयं ते भ्रातृवत्सलः दयितः भ्राता भरतः यत्र ते रूपमादर्श इव तिष्ठति।
4. वक्षः प्रसारय मां सुविपुलेन भुजद्वयेन कपाटपुटप्रमाणमलिङ्गं शरदिन्दुकल्पम् इदम् आननम् उन्नामय इदं व्यसन शरीरम् प्रह्लादय।
5. नरपतिनिधनं भवत्प्रवासं भरतविषादम् कुलस्य अनाथतां दुष्प्रसह्यं गुण इव बहुविधमनुभूय बहु अपराद्धम् मे आयुषा।
6. इह देहेन स्थास्यामि तत्र कर्मणा स्थास्यामि भवतः नाम्ना एवं कृतरक्षं राज्यं भविष्यति।
7. वत्स, अहम् पितुः नियोगात् वनम् आगतः। न दर्पात् न भयात् न विभ्रमात् ते नः ब्रवीमि कुलं सत्यधनं कथं भवान् नीचपथे प्रवर्तते।
8. एते तव पादोपभुक्ते पादुके मे प्रयच्छ मूर्ध्ना प्रणताय, यावत् भवान एष्यति तावत् अनयोः विधेयः कार्यसिद्धिं भविष्यामि।

## शब्दार्थः

क्व = कुत्र, सन्निदर्शनं = उदाहरणम्, सारवताम् = शक्तिशालिनाम्/धैर्यधनानाम्, विग्रहवत् = शरीरवत्, स्थाप्यताम् = निक्षिप्यताम्, लुब्धायाः = लोलुपायाः, प्राकृतः = नीचः, यातु = गच्छतु, अबान्धवस्य = शत्रोः अन्यस्य वा, क्लेदयति = आर्द्रयति, बाढ़म् = शोभनम्, भ्रातृवत्सलः = भ्रातृस्नेहकारकः, मैथिलि = सीते, जानकि, चक्षुः = नेत्रम्, अभिवादये = प्रणमामि, सुविपुलेन = विशालेन, इह = अत्र, प्रतिग्रहीतुम् = प्रतिदातुम्, दुष्प्रसह्यम् = दुःखेन सोढुं शक्यम्, पर्यवस्थापयामि = व्यवस्थापयामि, आपः = जलम्, शुश्रूषयिष्ये = सेवां सम्पादयिष्ये, विशीर्यते = विच्छिद्यते, नियोगात् = आदेशात्, विधेयः = सेवकः।

## अभ्यासः

### प्रश्नवैविध्यम्

**1. एकपदेन उत्तरं लिखत –**

क. भरतः कस्याः पुत्रः?

ख. रामस्य हृदयं कः क्लेदयति?

ग. रामस्य सङ्क्रान्तं रूपं कस्मिन् तिष्ठति।

घ. अयं पाठः कस्मात् ग्रन्थात् उद्धृतः?

**2. एकवाक्येन उत्तरं लिखत –**

क. सीतारामलक्ष्मणेषु के विग्रहवत् स्थिताः?

ख. भरतः स्वस्य कृते कानि विशेषणानि प्रयुक्तवान्?

ग. सुमन्त्रः किमर्थं शोकं करोति?

घ. राज्यं कृतरक्षं कथं भविष्यति?

3. **त्रिचतुर्वाक्यैः उत्तरं लिखत -**

क. भरतः सुमन्त्रं किम् अपृच्छत्?

ख. भरतविषये लक्ष्मणो रामं किमवोचत्?

ग. भरतो रामाय किं निवेदितवान्?

घ. रामः भरताय किमादिष्टवान्?

ङ. भरतः अन्यं कं वरम् इष्टवान्?

4. **समुचितपदेन रिक्तस्थानं पूरयत -**

क. अयं ते दयितो भ्राता भरतो ..................। (भक्तवत्सलः/भ्रातृवत्सलः)

ख. अत्र .................. सीता च लक्ष्मणश्च महायशाः। (रामः/भरतः)

ग. राज्यलुब्धायाः .................. पुत्रो भरतः प्राप्त इति। (कौशल्यायाः/कैकेय्याः)

घ. तव राज्यं .................. प्रतिग्रहितुमिच्छामि। (पञ्चदशवर्षान्ते/चतुर्दशवर्षान्ते)

ङ. पादोपभुक्ते तव .................. मे एते प्रयच्छ प्रणताय मूर्ध्ना। (चरणे/पादुके)

5. **मेलनं कुरुत -**

| | (अ) | (आ) |
|---|---|---|
| क. | दशरथः | रामः |
| ख. | सुमन्त्रः | सीता |
| ग. | भरताग्रजः | सारथिः |
| घ. | रामस्य पत्नी | नृपः |

## भाषिककार्यम्

6. **विभक्तिनियोजनपूर्वकं भ्रातृशब्दस्य प्रयोगेण वाक्यनिर्माणं कुरुत -**

सप्तमी, सम्बोधनम्, प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी।

7. **धातुलकारवचनानि लिखत -**

क. विशीर्यते

ख. अस्मि

ग. करोति

घ. तिष्ठतु

ङ. क्लेदयति

च. भविष्यति

छ. शुश्रूषयतु

8. **सन्धिविच्छेदं कुरुत -**

क. क्वासौ ख. सन्निदर्शनम्

ग. कृतघ्नश्च घ. यात्विति

ङ. क्लेदयतीव च. पादोपभुक्ते

9. **समासविग्रहं कुरुत -**

क. महायशाः

ख. राज्यलुब्धायाः

ग. अबान्धवः

घ. भ्रातृवत्सलः

ङ. सहर्षम्

च. कृतरक्षम्

10. **प्रकृतिप्रत्ययं चिनुत -**

क. निक्षिप्तम्

ख. उपागम्य

ग. आगतः

घ. उपेत्य

ङ. शुश्रूषयितव्यः

11. **अधोलिखितानाम् अव्ययपदानां वाक्येषु प्रयोगं कुरुत -**

क्व, इह, अथ, बाढम्, यत्र, इव।

**योग्यताविस्तारः -**

❖ भ्रातृवत्सलकथानां नाटकानां परिचयः कार्यः तथा भ्रातृस्नेहस्य परिचयोऽपि।

* * * * *